तस्योदरान्नखविदीर्णवपाद्य आर्च्छं-
त्तस्मै नमो नृहरयेऽखिलधर्म्मगोप्त्रे ॥"
इति श्रीमद्भागवते ७ स्कन्धे ८ अध्याय: ॥
अपि च ।
"यद्दीपे चिपती समस्तजगतो सशोकशोका-
मुधौ
राधा सम्भृतकाकुराकुलमसौ चक्रे तथा
क्रन्दनम् ।
येन स्यन्दननेमिनिर्म्मितमहासीमन्तदम्भादिदं
चा सर्व्वं सहयापि निर्भरमभूद्दूराद्विदीर्णं
सुवा ॥"
इत्युज्ज्वलनीलमणि: ॥
विदु:, पुं, ( वेत्ति संग्राममनेनेति । विद्+बाहु-
लकात् कु: । ) गजकुम्भद्वयमध्यभाग: । इत्य-
मर: ॥ ( अश्वकर्णाधोभाग: । यथा, अश्व-
वैद्यके । २ । १४ ।
"विदुर्मर्म्मविदुश्चैव कर्णस्याध: सकृत्तुवे ।")
जानन्ति । इति क्रियापदम् ॥ ( यथा, महा-
भारते । १ । १२० । २८ ।
"अपत्यं नाम लोकेषु प्रतिष्ठा धर्म्मसंहिता ।
इति कुन्ति ! विदुर्धीरा: शाश्वतं धर्म्म-
वादिन: ॥")
विदुर:, पुं, ( वेत्ति तच्छील: । विद्+"विदिभिदि-
च्छिदे: कुरच् ।"३ । २ । १६२ । इति कुरच् ।)
नागर: । धीर: । कौरवाणां मन्त्री । इति
मेदिनी । रे, ११५ ॥ विदुरोत्पत्तिर्यथा,—
"क्षेत्रेऽप्रजस्य वै भ्रातुर्मातोक्तो बादरायण: ।
धृतराष्ट्रञ्च पाण्डुञ्च विदुरञ्चाप्यजीजनत् ॥"
इति श्रीभागवते । ९ । २२ ॥
ज्ञातरि, त्रि । इत्यमर: ॥ * ॥
विदुल:, पुं, ( विशेषेण दोलयतीति । वि+दुल+
क: । ) वेतस: । अम्बुवेतस: । इत्यमर: ॥ गन्ध-
रस: । इति रत्नमाला ॥
विदुषी, स्त्री, (वेत्तीति । विदे: शतुर्वसु: । उगित-
श्चेति ङीप् । ) पण्डिता स्त्री । इति मुग्धबोध-
व्याकरणम् ॥ ( यथा, नैषधे । २ ।
"चिकुरप्रकरा जयन्ति ते
विदुषी मूर्द्धनि सा बिभर्त्ति यान् ।" )
विदुष्मती, त्रि, ( विद्यास्ति अस्यामिति । विद्वस्
मतुप् । स्त्रियां ङीप् ।) पण्डितवती । यथा,—
"दौर्म्मात्यश्चतितेव पन्नगपुरी शेषाहिनेवा-
भवद्-
वैनैकेन विदुष्मती वसुमती सुखेन संस्थाव-
ताम् ॥"
इति वोपदेवप्रशंसा ॥
विदू:, पुं, विदु: । गजकुम्भयोर्मध्यम् । इत्यमर-
टीका ॥
विदूर:, त्रि, ( विशिष्टं दूरं यस्य । ) अतिदूरस्थ-
देशादि । यथा,—
"माधावनटो तव जलधरोत्कण्ठया शुष्ककण्ठ:
सारङ्गोऽसौ युगशतमिव आनिनायातितृ-
ष्णात् ।
आस्तां तावन्नवजलकणाभाजनत्वं विदूरे
वर्षारम्भप्रथमसमये दारुणो वज्रपात: ॥"
इति चातकाष्टकम् ॥
( पर्व्वतविशेषे, पुं । यथा, कुमारे । १ । २४ ।
"तया दुहित्रा सुतरां सवित्री-
स्फुरत्प्रभामण्डलया चकाशे ।
विदूरभूमिर्नवमेघशब्दा-
दुद्भिन्नया रत्नशलाकयेव ।")
विदूरग:, त्रि, अतिदूरगन्ता । विदूरे गच्छती-
त्यर्थे डप्रत्ययेन निष्पन्न: ॥
विदूरजं, क्ली, (विदूरे पर्व्वते जायते इति । जन+
ड: । ) विदूरपर्व्वतजरत्नम् । वैदूर्य्यमणि: ।
अतिदूरजाते, त्रि । इति केचित् ॥
विदूरथ:, पुं, राजविशेष: । यथा,—
"मनोस्तु दक्षपुत्त्रस्य द्वादशस्यात्मजान् शृणु ।
देववानुपदेवश्च देवश्रेष्ठो विदूरथ: ॥
मित्रवान् मित्रदेवश्च मित्रविन्दश्च वीर्य्यवान् ।
मित्रवाह: सवर्चाश्च दक्षपुत्त्रमनो: सुता: ॥"
इति गारुड़े ८७ अध्याय: ॥
( कुरुपुत्त्र: । यथा, महाभारते । १ । ९५ ।
३९—४० ।
"कुरु: खलु दाशार्हीमुपयेमे सुभाङ्गीं नाम
तस्यामस्य जज्ञे विदूरथ: । विदूरथस्तु माधवी-
मुपयेमे संप्रियां नाम तस्यामस्य जज्ञे अनश्वा
नाम ।"* । वृष्णिवंशीयानामन्यतम: । यथा,
भागवते । ९ । २४ । १८ ।
"पृथुर्विदूरथाद्याश्च बहवो वृष्णिनन्दना: ॥"
अस्य पुत्त्र: शूर: । यथा, तत्रैव ।९।२४।२६।
"शूरो विदूरथादासीत् भजमानस्तु तत्सुत: ।
शिनिस्तस्मात् स्वयं भोजो हृदिकस्तत्सुतो
मत: ॥")
विदूरभूमि:, स्त्री, ( विदूरस्य भूमि: । ) विदूर-
देश: । यत्र वैदूर्य्यमणिरुत्पद्यते । यथा,—
"तया दुहित्रा सुतरां सवित्री
स्फुरत्प्रभामण्डलया चकाशे ।
विदूरभूमिर्नवमेघशब्दा-
दुद्भिन्नया रत्नशलाकयेव ॥"
इति कुमारसम्भवम् ॥
विदूराद्रि:, पुं, ( विदूरनामकोऽद्रि: । ) विदूर-
पर्व्वत: । इति जटाधर: ॥
विदूषक:, त्रि, ( विदूषयति आत्मानमिति । वि+
दूष+णिच्+ण्वुल् । ) कामुक: । तत्पर्य्याय: ।
विड्ग: २ खलीक: ३ षट्प्रज्ञ: ४ कामकेलि:
५ पीठकेलि: ६ पीठमर्द्द: ७ भविल: ८ छिदुर:
९ विट: १० । इति त्रिकाण्डशेष: ॥ चाटुवटु:
११ वासन्तिक: १२ केलिकिल: १३ वैहासिक:
१४ प्रहासी १५ प्रीतिद: १६ । इति हेम-
चन्द्र: ॥ परनिन्दाकर: । इति मेदिनी । के,२१४॥
तत्पर्य्याय: । खल: २ दम्भक: ३ अभीक: ४ क्रूर:
५ सूचक: ६ कण्टक: ७ नाग: ८ मलिनास्य:
९ परद्वेषी १० । इति शब्दमाला ॥ चतुर्धा-
नायकान्तर्गतनायकविशेष: । तस्य लक्षणं
यथा । अङ्गादिवैकृत्यैर्हास्यकारी विदूषक: ।
अस्योदाहरणं यथा,—
"आनीय नीरजमुखीं शयनोपकण्ठ-
मुत्कण्ठतोऽस्मि कुचकञ्चुकमोचनाय ।
अत्रान्तरे मुहुरकारि विदूषकेण
प्रातस्तनस्तरुणकुक्कुटकण्ठनाद: ॥"
इति रसमञ्जरी ॥
(अयन्तु शृङ्गारसहाय: । यथा, साहित्यदर्पणे ।
३ । ७७ ।
"शृङ्गारस्य सहाया विटचेटविदूषकाद्या: स्यु: ।
भक्ता नर्म्मसु निपुणा: कुपितवधूमानभञ्जना:
शुद्धा: ॥"
दूषणकारके, त्रि । यथा, भागवते ।५।६।१०।
"येनह वाव कलौ मनुजापसदा देवमाया-
विमोहिता: * * * * ब्रह्मब्राह्मणयज्ञपुरुष-
लोकविदूषका: प्रायेण भविष्यन्ति ॥")
विदूषणं, क्ली, विशेषेण दूषणम् । विपूर्व्वान्त-
दुषधातोरनट्(ल्युट्)प्रत्ययेन निष्पन्नम् ॥
विदेश:, पुं, ( विप्रकृष्टो देश: ।) परदेश: । देशा-
न्तरम् । यथा । अशौचकालाभ्यरे विदेशस्था-
शौचश्रवणे शेषाहै: शुद्धि: । इति शुद्धितत्त्वम् ॥
अन्यच्च ।
"कोऽतिभार: समर्थानां किं दूरं व्यवसायि-
नाम् ।
को विदेश: सविद्यानां क: पर: प्रियवादिनाम् ॥"
इति चाणक्ये ॥
अन्यत् देशान्तरशब्दे द्रष्टव्यम् ॥
विदेह:, पुं, जनकान्वयभूमिप: । ( यथा, देवी-
भागवते । १ । १६ । ५२ ।
"इदमिच्छाम्यहं भूपं विदेहं नृपसत्तमम् ।
कथं तिष्ठति संसारे पद्मपत्रमिवाम्भसि ।"
विगतो देहो यस्य । ) कायशून्ये, त्रि । इति
मेदिनी । हे, २४ ॥ ( यथा, महाभारते ।
३ । १०७ । २६ ॥
"छिन्नशीर्षा विदेहाश्च भिन्नत्वगस्थिसन्धय: ।
प्राणिन: समदृश्यन्त शतशोऽथ सहस्रश: ।")
निमिराजस्य विदेहत्वकारणम् । यथा,—
"असमाप्ते ततो यज्ञे वशिष्ठस्तागमद्दिव: ।
तं दृष्ट्वा कुपित: प्राह प्रत्याख्यातोऽस्मि
पार्थिव ।
यस्मात्तस्मात् शपेयं त्वां विदेहस्त्वं भविष्यसि ॥"
इति वह्निपुराणे सूर्य्यवंशसमाप्ताध्याय: ॥
विदेहा, स्त्री, मिथिला । इति हेमचन्द्र: ॥ (यथा,
रघु: । १२ । २६ ।
"वभौ तमनुगच्छन्ती विदेहाधिपते: सुता ।
प्रतिषिद्धापि कैकेय्या लक्ष्मीरिव गुणोन्मुखी ।")
विद्ध:, त्रि, ( विध्यते स्मेति । व्यध+क्त: । )
छिद्रित: । इत्यमर: ॥ क्षिप्त: । सदृश: ।
बाधित: । इति मेदिनी । धे, १६ ॥ ( यथा,
मार्कण्डेये । ५० । ७० ।
"तरुगुल्मादिभिर्द्वारं न विद्धं यस्य वेश्मन: ।
मर्म्मभेदोऽथवा पुंसस्तत् श्रेयो भवनं न ते ॥")